Signature and Name of Invigilator

1. (Signature) ______________________

(Name) ______________________

2. (Signature) ______________________

(Name) ______________________

OMR Sheet No. : ........................................
(To be filled by the Candidate)

Roll No. | | | | | | | | |
(In figures as per admission card)

Roll No. ______________________
(In words)

# PAPER - II

J 0 7 3 1 8

# SANSKRIT TRADITIONAL SUBJECTS

Time : 2 hours] [Maximum Marks : 200

Number of Pages in this Booklet : 12 Number of Questions in this Booklet : 100

## Instructions for the Candidates

1. Write your roll number in the space provided on the top of this page.
2. This paper consists of hundred multiple-choice type of questions.
3. At the commencement of examination, the question booklet will be given to you. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as below :
   (i) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker-seal and do not accept an open booklet.
   (ii) **Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to pages/questions missing or duplicate or not in serial order or any other discrepancy should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.**
   (iii) After this verification is over, the Test Booklet Number should be entered on the OMR Sheet and the OMR Sheet Number should be entered on this Test Booklet.
4. Each item has four alternative responses marked (1), (2), (3) and (4). You have to darken the circle as indicated below on the correct response against each item.

   **Example :** ① ② ● ④ where (3) is the correct response.
5. Your responses to the items are to be indicated in the **OMR Sheet given inside the Booklet only.** If you mark your response at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Read instructions given inside carefully.
7. Rough Work is to be done in the end of this booklet.
8. If you write your Name, Roll Number, Phone Number or put any mark on any part of the OMR Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, such as change of response by scratching or using white fluid, you will render yourself liable to disqualification.
9. You have to return the original OMR Sheet to the invigilators at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are however, allowed to carry original question booklet on conclusion of examination.
10. **Use only Blue/Black Ball point pen.**
11. **Use of any calculator or log table etc., is prohibited.**
12. **There are no negative marks for incorrect answers.**

## परीक्षार्थियों के लिए निर्देश

1. इस पृष्ठ के ऊपर नियत स्थान पर अपना रोल नम्बर लिखिए।
2. इस प्रश्न-पत्र में सौ बहुविकल्पीय प्रश्न हैं।
3. परीक्षा प्रारम्भ होने पर, प्रश्न-पुस्तिका आपको दे दी जायेगी। पहले पाँच मिनट आपको प्रश्न-पुस्तिका खोलने तथा उसकी निम्नलिखित जाँच के लिए दिये जायेंगे, जिसकी जाँच आपको अवश्य करनी है :
   (i) प्रश्न-पुस्तिका खोलने के लिए पुस्तिका पर लगी कागज की सील को फाड़ लें। खुली हुई या बिना स्टीकर-सील की पुस्तिका स्वीकार न करें।
   (ii) **कवर पृष्ठ पर छपे निर्देशानुसार प्रश्न-पुस्तिका के पृष्ठ तथा प्रश्नों की संख्या को अच्छी तरह चैक कर लें कि ये पूरे हैं। दोषपूर्ण पुस्तिका जिनमें पृष्ठ/प्रश्न कम हों या दुबारा आ गये हों या सीरियल में न हों अर्थात् किसी भी प्रकार की त्रुटिपूर्ण पुस्तिका स्वीकार न करें तथा उसी समय उसे लौटाकर उसके स्थान पर दूसरी सही प्रश्न-पुस्तिका ले लें। इसके लिए आपको पाँच मिनट दिये जायेंगे। उसके बाद न तो आपकी प्रश्न-पुस्तिका वापस ली जायेगी और न ही आपको अतिरिक्त समय दिया जायेगा।**
   (iii) इस जाँच के बाद प्रश्न-पुस्तिका का नंबर OMR पत्रक पर अंकित करें और OMR पत्रक का नंबर इस प्रश्न-पुस्तिका पर अंकित कर दें।
4. प्रत्येक प्रश्न के लिए चार उत्तर विकल्प (1), (2), (3) तथा (4) दिये गये हैं। आपको सही उत्तर के वृत्त को पेन से भरकर काला करना है जैसा कि नीचे दिखाया गया है।

   **उदाहरण :** ① ② ● ④ जबकि (3) सही उत्तर है।
5. प्रश्नों के उत्तर **केवल प्रश्न पुस्तिका के अन्दर दिये गये OMR पत्रक पर ही** अंकित करने हैं। यदि आप OMR पत्रक पर दिये गये वृत्त के अलावा किसी अन्य स्थान पर उत्तर चिह्नांकित करते हैं, तो उसका मूल्यांकन नहीं होगा।
6. अन्दर दिये गये निर्देशों को ध्यानपूर्वक पढ़ें।
7. कच्चा काम (Rough Work) इस पुस्तिका के अन्तिम पृष्ठ पर करें।
8. यदि आप OMR पत्रक पर नियत स्थान के अलावा अपना नाम, रोल नम्बर, फोन नम्बर या कोई भी ऐसा चिह्न जिससे आपकी पहचान हो सके, अंकित करते हैं अथवा अभद्र भाषा का प्रयोग करते हैं, या कोई अन्य अनुचित साधन का प्रयोग करते हैं, जैसे कि अंकित किये गये उत्तर को मिटाना या सफेद स्याही से बदलना तो परीक्षा के लिये अयोग्य घोषित किये जा सकते हैं।
9. आपको परीक्षा समाप्त होने पर मूल OMR पत्रक निरीक्षक महोदय को लौटाना आवश्यक है और परीक्षा समाप्ति के बाद उसे अपने साथ परीक्षा भवन से बाहर न लेकर जायें। हालांकि आप परीक्षा समाप्ति पर मूल प्रश्न-पुस्तिका अपने साथ ले जा सकते हैं।
10. **केवल नीले/काले बाल प्वाईंट पेन का ही प्रयोग करें।**
11. **किसी भी प्रकार का संगणक (कैलकुलेटर) या लाग टेबल आदि का प्रयोग वर्जित है।**
12. **गलत उत्तरों के लिए कोई नकारात्मक अंक नहीं हैं।**

**संस्कृत - परम्परागत विषयः**
**संस्कृत परम्परागत विषय**
**SANSKRIT TRADITIONAL SUBJECTS**
**प्रश्नपत्रम् - II**
**प्रश्नपत्र - II**
**Paper - II**

**निर्देशः** अस्मिन् प्रश्नपत्रे **एकं शतम्** (100) बहुविकल्पीय प्रश्नाः सन्ति। तेषु प्रतिप्रश्नमङ्कद्वयम्। **सर्वे** प्रश्नाः उत्तरणीयाः।
**नोट :** इस प्रश्नपत्र में **सौ (100)** बहु-विकल्पीय प्रश्न हैं। प्रत्येक प्रश्न के **दो (2)** अंक हैं। **सभी** प्रश्नों के उत्तर दें।
**Note :** This paper contains **hundred (100)** objective type questions of **two (2)** marks each. **All** questions are **compulsory**.

1. 'येन कर्माणि अपसो मनीषिणः' - अत्र 'अपसः' पदस्य कोऽर्थः ?
   (1) कर्मनिष्ठाः (2) योगरताः (3) ज्ञानहीनाः (4) कर्महीनाः

2. 'विघ्नेश विधिमार्तण्डचन्द्रेन्द्रोपेन्द्रवन्दित।
   नमो गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते।।'
   - श्लोकोऽयं कुत्र प्राप्यते ?
   (1) ऋग्वेदे (2) सायणभाष्ये (3) स्कन्दस्वामिभाष्ये (4) शुक्लयजुर्वेदे

3. 'यो वाघते ददाति सूनरं वसु' - अत्र 'वाघते' पदस्य कोऽर्थः ?
   (1) यज्ञकर्त्रे (2) राज्ञे (3) सूर्याय (4) प्रजापतये

4. 'यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे' - अत्र 'ओकांसि' पदस्य कोऽर्थः ?
   (1) हवींषि (2) आहुतयः (3) मन्त्राः (4) गृहाणि

5. 'आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे' - कस्य सूक्तस्यायं अंशः ?
   (1) रुद्रसूक्तस्य (2) श्रीसूक्तस्य (3) वरुणसूक्तस्य (4) पर्जन्यसूक्तस्य

6. 'कन्या' इति पदे कीदृशः स्वरितः स्वरः ?
   (1) जात्यः (2) अभिनिहितः (3) क्षैप्रः (4) प्रश्लिष्टः

7. 'एकेनाङ्गेन दिवो अस्य' - शुक्लयजुर्वेदीये मन्त्रेऽस्मिन् 'अस्य' कीदृशं पदमस्ति ?
   (1) आद्युदात्तम् (2) अन्तोदात्तम् (3) सर्वानुदात्तम् (4) प्रचयमयम्

8. 'इषे त्वोर्जे' इति यजुर्वेदसंहिताभागे 'त्वा' इति पदं कीदृशं वर्तते ?

(1) आद्युदात्तम् (2) अनुदात्तम् (3) स्वरितम् (4) एकोदात्तम्

9. 'समिधाग्निं दुवस्यत' - इत्यत्र 'दुवस्यत' पदस्य कोऽर्थः ?

(1) दूरं गमयत (2) निरसनं कुरुत (3) आह्वयत (4) परिचरत

10. 'स भूमिं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्' - कस्य सूक्तस्यायं मन्त्रः ?

(1) ब्रह्मणस्पतिसूक्तस्य (2) ऋग्वेदीयपुरुषसूक्तस्य

(3) हिरण्यगर्भसूक्तस्य (4) शुक्लयजुर्वेदीयपुरुषसूक्तस्य

11. 'उरुगायः' कस्य वैदिकदेवस्य विशेषणमस्ति ?

(1) विष्णोः (2) इन्द्रस्य (3) अग्नेः (4) मरुतः

12. 'अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि' - अत्र यास्कदिशा 'अध्वरम्' इत्यस्य कोऽर्थः ?

(1) ध्वंसम् (2) हिंसारहितम् (3) धूमः (4) धूमाकुलम्

13. शुक्लयजुर्वेदसंहितायामुभयतोनमस्कारमन्त्राः कस्मिन्नध्याये विद्यन्ते ?

(1) प्रथमे (2) तृतीये (3) षोडशे (4) चत्वारिंशे

14. 'हलायुधः' कस्याः संहितायाः भाष्यकारः अस्ति ?

(1) ऋग्वेदस्य (2) कृष्णयजुर्वेदस्य (3) शुक्लयजुर्वेदस्य (4) अथर्ववेदस्य

15. सांख्यमते 'समानाभिहारात्' इति हेतुः कुत्रोल्लिखितः ?

(1) सृष्ट्यभावे (2) आप्तवचनाभावे (3) अनुमानाभावे (4) प्रत्यक्षाभावे

16. सांख्यमते तमोगुणस्य स्वरूपं कीदृशमुच्यते ?

(1) लघु (2) गुरु (3) चलम् (4) इष्टम्

17. सांख्ये अयुगपत्प्रवृत्तिः कस्य सिद्धौ हेतुः ?

(1) पुरुषबहुत्वस्य (2) सत्कार्यवादस्य (3) प्रत्ययसर्गस्य (4) गुणत्रयस्य

18. ‘क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः’ – केनोक्तेयं सूक्तिः ?
(1) कपिलमुनिना (2) पतञ्जलिना (3) ईश्वरकृष्णेन (4) गौतमेन

19. योगमतेन परिणामस्य भेदेषु को न गण्यते ?
(1) धर्मपरिणामः (2) लक्षणपरिणामः (3) क्रियापरिणामः (4) अवस्थापरिणामः

20. सांख्यकारिकानुसारं दुःखत्रयविनाशः कस्मात् सम्भवति ?
(1) दृष्टोपायात् (2) व्यक्ताव्यक्तज्ञविज्ञानात्
(3) वेदात् (4) गुणदोषविवेचनात्

21. शैवागमदृशा पशुः कीदृशः अभिहितः ?
(1) देहादिरूपः (2) प्रकाश्यः (3) अनणुः (4) क्षणिकः

22. शैवागमे विद्येश्वराष्टके को न विद्यते ?
(1) अनन्तः (2) सूक्ष्मः (3) त्रिमूर्तिकः (4) शिवाद्वयः

23. वाराहीतन्त्रोक्तेषु आगमलक्षणेषु किं न गण्यते ?
(1) सृष्टिः (2) प्रलयः (3) पुरश्चरणम् (4) स्थितिः

24. अन्नम्भट्टोक्तं मनसः स्वरूपं किं विद्यते ?
(1) सान्तम् (2) स्थूलम् (3) नित्यम् (4) अनिन्द्रियम्

25. तर्कसङ्ग्रहे दिव्यमिति कस्य प्रभेद उक्तः ?
(1) वायोः (2) तेजसः (3) आकाशस्य (4) कालस्य

26. ‘शब्दो गुणः चाक्षुषत्वात्’ – इति कस्योदाहरणम् ?
(1) स्वरूपासिद्धस्य (2) आश्रयासिद्धस्य (3) व्याप्यत्वासिद्धस्य (4) अन्यथासिद्धस्य

27. ‘वह्निरनुष्णो द्रव्यत्वात्’ – इति कस्य हेत्वाभासस्योदाहरणम् ?
(1) असिद्धस्य (2) बाधितस्य (3) सत्प्रतिपक्षस्य (4) विरुद्धस्य

28. तर्कभाषादिशा इन्द्रियलक्षणं किं न विद्यते ?
(1) शरीरसंयुक्तम् (2) अतीन्द्रियम् (3) ज्ञानकरणम् (4) चेष्टात्मकम्

29. कारिकावल्यामलौकिकसन्निकर्षे को गण्यते ?
(1) सामान्यलक्षण: (2) विशेषलक्षण: (3) शास्त्रलक्षण: (4) देवलक्षण:

30. ऊर्ध्वज्वलनं कर्मभेदेषु कुत्रान्तर्भवति ?
(1) उत्क्षेपणे (2) प्रसारणे (3) गमने (4) आकुञ्चने

31. जन्मकुण्डल्यां निम्नलिखितेषु कतमो भावो 'दुष्टस्थानम्' कथ्यते ?
(1) पञ्चम: (2) अष्टम: (3) चतुर्थ: (4) सप्तम:

32. को राशि: सूर्यस्य नीचराशि: कथ्यते ?
(1) वृष: (2) मेष: (3) तुला (4) धनु:

33. जन्मकुण्डल्यां लग्नस्य कतमो भावो विद्यते ?
(1) प्रथम: (2) द्वितीय: (3) सप्तम: (4) दशम:

34. 'क्रान्तिवृत्तम्' किं भवति ?
(1) पृथ्व्या दैनिकभ्रमणवृत्तम् (2) पृथ्व्या वार्षिकभ्रमणवृत्तम्
(3) राशिचक्रम् (4) चन्द्रस्य भ्रमणमार्ग:

35. कृत्तिकानक्षत्रस्य स्वामी कोऽस्ति ?
(1) अग्नि: (2) यम: (3) ब्रह्मा (4) चन्द्र:

36. 'सप्ताष्टवह्नय:' इत्यनेन प्रयोगेण का संख्या वाच्यते ?
(1) 785 (2) 783 (3) 387 (4) 587

37. ''पौष्णान्ते भगण: स्मृत:'' – इत्यस्मिन् वाक्ये 'पौष्ण' शब्दस्य कोऽर्थ: ?
(1) पुष्यनक्षत्रम् (2) रेवतीनक्षत्रम् (3) पौषमास: (4) पूर्णिमा

38. षण्मासात्मकं दिनं तत्प्रमाणा च रात्रि: कुत्र भवत: ?
(1) ध्रुवयो: (2) 66½ अंशात्मकेऽक्षांशे
(3) 75 अंशात्मकेऽक्षांशे (4) निरक्षदेशे

39. सौरमास: कथं गण्यते ?
(1) तिथिभि: (2) संक्रान्त्या (3) सावनदिनै: (4) नाक्षत्रदिनै:

40. एकस्मिन् चतुर्युगे कति दिव्यवर्षाणि भवन्ति ?

(1) 4320000 (2) 36000 (3) 432000 (4) 12000

41. महाभारतस्य द्वितीयपर्वणः किन्नाम ?

(1) वनपर्व (2) सभापर्व (3) भीष्मपर्व (4) विराटपर्व

42. सनत्कुमारसंहिता सूतसंहिता च कस्मिन् पुराणे वर्तेते ?

(1) वामनपुराणे (2) ब्रह्मवैवर्तपुराणे (3) पद्मपुराणे (4) स्कन्दपुराणे

43. महात्मना विदुरेण पञ्चविधेषु बलेषु श्रेष्ठं बलं किमुक्तम् ?

(1) प्रज्ञाबलम् (2) बाहुबलम् (3) अभिजातबलम् (4) धनबलम्

44. 'देवव्रत' – इति कस्य नाम आसीत् ?

(1) युधिष्ठिरस्य (2) भीष्मस्य (3) कर्णस्य (4) विश्वामित्रस्य

45. 'पुरा नवं भवति' पुराणस्य व्युत्पत्तिरियं कुत्र वर्तते ?

(1) निरुक्ते (2) वायुपुराणे (3) पद्मपुराणे (4) ब्रह्माण्डपुराणे

46. पुराणस्य पञ्चलक्षणेषु किं न गण्यते ?

(1) सर्गः (2) प्रतिसर्गः (3) मन्वन्तराणि (4) कर्मफलम्

47. श्रीमद्भागवते कति स्कन्धाः सन्ति ?

(1) चतुर्दश (2) द्वादश (3) त्रयोदश (4) षोडश

48. 'दुर्गासप्तशती' कस्मिन् पुराणे वर्तते ?

(1) मार्कण्डेयपुराणे (2) देवीभागवतपुराणे (3) शिवपुराणे (4) वायुपुराणे

49. 'महेन्द्रपर्वतः' केनावतारेण सम्बद्धोऽस्ति ?

(1) कृष्णावतारेण (2) वराहावतारेण (3) वामनावतारेण (4) परशुरामावतारेण

50. कृष्णस्य पत्नी 'सत्यभामा' कस्य पुत्र्यासीत् ?

(1) उद्धवस्य (2) सत्राजितः (3) अक्रूरस्य (4) रुक्मिणः

51. शब्दार्थसम्बन्धानां नित्यत्वप्रतिपादकं भाष्यकारवचनं किमात्मकम् ?

(1) पृषोदरादीनि यथोपदिष्टम् (2) तदशिष्यं सञ्ज्ञाप्रमाणत्वात्

(3) सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः (4) सिद्धे शब्दार्थसम्बन्धे

52. 'असन्देहार्थमध्येयं व्याकरणमि' त्यत्र असन्देहो नाम सन्देहाभावः। तत्र कीदृशोऽभावः ?

(1) प्रागभावः (2) प्रध्वंसाभावः (3) अत्यन्ताभावः (4) अन्योन्याभावः

53. स्फोटः कीदृशः ?

(1) श्रोत्रग्राह्यः (2) बुद्धिनिर्ग्राह्यः (3) त्वग्ग्राह्यः (4) चक्षुर्ग्राह्यः

54. 'भूवादयो धातवः' इत्यत्र 'वा' शब्दः कीदृशो गृह्यते ?

(1) अव्ययवाची (2) द्रव्यवाची (3) गुणवाची (4) क्रियावाची

55. 'आ एवं नु मन्यसे' इत्यत्र प्रगृह्यसञ्ज्ञाविधायकमनुशासनं किम् ?

(1) अदसो मात् (2) निपात एकाजनाङ्

(3) ईदूदेद्द्विवचनं प्रगृह्यम् (4) सम्बुद्धौ शाकल्यस्येतावनार्षे

56. 'अव्ययं विभक्ती' त्यादिसूत्रान्तर्गत 'शब्दप्रादुर्भाव' इत्यर्थेऽव्ययीभावसमासस्य किमुदाहरणम् ?

(1) अधिहरि (2) इतिहरि (3) सहरि (4) यावच्छ्लोकम्

57. 'द्व्यङ्गुलम्' इत्यत्र समासविधायकं सूत्रं किम् ?

(1) कुगतिप्रादयः (2) तद्धितार्थोत्तरपदसमाहारे च

(3) उपपदमतिङ् (4) तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः

58. अधोलिखितस्त्रीप्रत्ययान्तेषु कः प्रयोगोऽशुद्धः ?

(1) शकटिः (2) शकटी (3) सर्वका (4) रात्री

59. 'गतिबुद्धिप्रत्यवसानार्थे' त्यादिसूत्रस्थ - 'बुद्धि' पदं ज्ञानसामान्यार्थकमित्यत्र किम्प्रमाणम् ?

(1) 'दृशेश्चे'ति वार्तिकम् (2) 'नियन्तृकर्तृकस्य वहेरनिषेधः' इति वार्त्तिकम्

(3) 'शब्दायतेर्ने'ति वार्तिकम् (4) 'हृक्रोरन्यतरस्यामि'ति सूत्रम्

60. 'अधीती व्याकरणे' इत्यत्र सप्तमीविधायकं किमनुशासनं प्रवर्तते ?

(1) यतश्च निर्धारणम् (2) स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च

(3) सप्तमी-पञ्चम्यौ कारकमध्ये (4) क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्

61. 'उच्छून:' इत्यत्र निष्ठा-तकारस्य नत्वविधायकं सूत्रं किम्?
(1) ल्वादिभ्य: (2) ओदितश्च
(3) रदाभ्यां निष्ठातो न: पूर्वस्य च द: (4) संयोगादेरातो धातोर्यण्वत:

62. सिद्धावस्थापन्नधात्वर्थवाच्ये 'पच्' धातो: किं रूपम्?
(1) पचति (2) पपाच (3) पक्ष्यति (4) पाक:

63. 'उपसर्गे घो: कि:' इत्यनेन 'कि' प्रत्यय: कस्मिन्नर्थे भवति?
(1) कर्तरि (2) कर्मणि (3) भावे (4) कर्मकर्तरि

64. 'नारायणायुधादीनां तद्रूपस्मरणार्थमपेक्षितार्थसिद्ध्यर्थञ्च' इत्यनेन माध्वदर्शने का सेवाऽभिहिता?
(1) नामकरणसेवा (2) अङ्कनसेवा (3) भजनसेवा (4) परिरक्षणसेवा

65. 'आत्मा तत्त्वमसी'त्यादौ मध्वाचार्यमते कीदृश: सन्धिविच्छेद:?
(1) आ + आत्मा + तत्त्वमसि (2) आत्मा + अतत् + त्वमसि
(3) आत्मा + तत्तु + अमसि (4) आत्मा + तत्त्वम् + असि

66. याज्ञवल्क्यमते व्यवहारे लिखितं प्रमाणं कतिविधम्?
(1) द्विविधम् (2) त्रिविधम् (3) षड्विधम् (4) सप्तविधम्

67. साग्नि: सोपासनो व्रजेत् – इति याज्ञवल्क्यवचने 'सोपासन' इत्यस्य कोऽर्थ:?
(1) गृह्याग्नि: (2) वैदिकाग्नि: (3) दक्षिणाग्नि: (4) आहवनीयाग्नि:

68. नक्तव्रते क: मुख्यकाल:?
(1) रात्रि: (2) सन्ध्या (3) मध्यरात्रि: (4) प्रदोष:

69. एकोद्दिष्टश्राद्धस्य क: मुख्यकर्मकाल:?
(1) पूर्वाह्ण: (2) मध्याह्न: (3) सायाह्न: (4) अपराह्ण:

70. मनुमते दक्षिणाग्निरिति क: कथ्यते?
(1) गुरु: (2) माता (3) पिता (4) उपाध्याय:

71. मनुमते के झल्ला:?
(1) नटा: (2) बाहुबला: (3) यष्टिप्रहरणा: (4) नष्टा:

72. याज्ञवल्क्यमते ये विश्वास्य परधनमपहरन्ति ते किमुच्यन्ते?
(1) तस्करा: (2) स्वैरिण: (3) चाटा: (4) दुर्वृत्ता:

73. विकृतिसंस्कारस्योदाहरणं चिनुत ?
(1) स्वाध्यायोऽध्येतव्यः (2) अग्नीनादधीत (3) व्रीहीन् प्रोक्षति (4) व्रीहीनवहन्ति

74. ''चित्रया यजेत पशुकामः'' – इत्यत्र चित्राशब्दस्य चित्रत्वं कथं स्वीक्रियते ?
(1) पशुदर्शनेन (2) चित्रनिर्माणेन (3) छागदर्शनेन (4) विलक्षणद्रव्यद्वारेण

75. अधोलिखितेषु मीमांसादिशा सर्वतः प्रबलं किम् ?
(1) उत्पन्नशिष्टम् (2) उत्पत्तिशिष्टम् (3) अवशिष्टम् (4) नष्टम्

76. ''पञ्च पञ्चनखा भक्ष्याः'' इत्यत्र मीमांसायां कीदृशी परिसंख्या ?
(1) श्रौती (2) लाक्षणिकी (3) अभिधात्री (4) पारिभाषिकी

77. चातुर्मास्ययागे कति पर्वाणि ?
(1) चत्वारि (2) पञ्च (3) षड् (4) सप्त

78. ''सोऽयं चित्तचैत्तात्मकः स्कन्धः पञ्चविधो रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः'' सिद्धान्तोऽयं वर्तते –
(1) चार्वाकदर्शने (2) बौद्धदर्शने (3) आर्हतदर्शने (4) योगदर्शने

79. वेदान्तदर्शनानुसारेण अज्ञानं भवति –
(1) चतुष्कोटिविनिर्मुक्तम् (2) असत्
(3) सदसत् (4) सत्

80. अध्यासो वर्तते –
(1) स्मृतिरूपः (2) नित्यरूपः (3) कार्यरूपः (4) कारणरूपः

81. विवर्तवादः कस्य सिद्धान्तः ?
(1) नैय्यायिकानाम् (2) अद्वैतवेदान्तिनाम् (3) मीमांसकानाम् (4) सांख्यानाम्

82. वेदान्तदर्शनानुसारेण कोऽधिकारी भवति ?
(1) जिज्ञासुः (2) ब्रह्मचारी
(3) अज्ञः (4) साधनचतुष्टयसम्पन्नः प्रमाता

83. वेदान्तसारानुसारेण कतिविधः समाधिः
(1) चतुर्विधः (2) पञ्चविधः (3) षड्विधः (4) द्विविधः

84. अधोऽङ्कितेषु केन सह कस्य सम्बन्ध: ?
उचितां तालिका चिनुत –

(a) देहच्छेदो मोक्ष: (i) सप्तभङ्गिनय:
(b) सर्वशून्यत्वम् (ii) चार्वाका:
(c) स्यादस्ति च नास्ति च (iii) सौत्रान्तिकबौद्धा:
(d) बाह्यार्थानुमेयत्वम् (iv) माध्यमिकबौद्धा:

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (1) | (i) | (iii) | (iv) | (ii) |
| (2) | (ii) | (i) | (iv) | (iii) |
| (3) | (ii) | (iv) | (i) | (iii) |
| (4) | (iii) | (i) | (ii) | (iv) |

85. वेदान्तसारानुसारम् अज्ञानशक्ति: कतिविधा ?
(1) चतुर्विधा (2) पञ्चविधा (3) द्विविधा (4) षड्विधा

86. काव्यप्रकाशे गुणीभूतव्यङ्ग्यस्य कियन्तो भेदा उक्ता: ?
(1) षट् (2) सप्त (3) अष्टौ (4) नव

87. 'व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कार:' – इत्यनेन किं निर्दिश्यते ?
(1) उत्तमोत्तमकाव्यम् (2) उत्तमकाव्यम् (3) मध्यमकाव्यम् (4) अधमकाव्यम्

88. 'काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्' – इत्येवं काव्यप्रयोजनं केन कृतम् ?
(1) मम्मटेन (2) वामनेन (3) भामहेन (4) विश्वनाथेन

89. ''यत्परस्यार्थे हास्यक्षोभकरं वच:'' साहित्यदर्पणे इदं कस्य लक्षणम् ?
(1) नालिकाया: (2) अवस्यन्दितस्य (3) गण्डस्य (4) व्याहारस्य

90. साहित्यदर्पणानुसारम् अधस्तनेषु क: महाकाव्यस्य अङ्गीरसो न भवति ?
(1) शृङ्गार: (2) वीर: (3) शान्त: (4) अद्भुत:

91. ''अहो नवनीतकल्पहृदय आर्यपुत्र:'' उक्तिरियं कुत्र प्राप्यते ?
(1) मृच्छकटिके (2) मध्यमव्यायोगे (3) विक्रमोर्वशीये (4) मालविकाग्निमित्रे

92. गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ।।
– अत्र कस्य केन समर्थनं कृतम्?

(1) सामान्यस्य सामान्येन (2) सामान्यस्य विशेषेण
(3) विशेषस्य सामान्येन (4) विशेषस्य विशेषेण

93. ''स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम्''
कुमारसम्भवे अनया उक्त्या कः प्रोक्तः?

(1) इन्द्रः (2) ब्रह्मा (3) बृहस्पतिः (4) शिवः

94. रौद्ररसस्य स्थायिभावः कः?

(1) शोकः (2) भयम् (3) उत्साहः (4) क्रोधः

95. ''भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः''
– अत्र विशेष्यं पदं किं वर्तते?

(1) मृदुरेणुः (2) पवनः (3) शिवः (4) पन्थाः

96. साहित्यदर्पणानुसारं कः धीरोद्धतनायको न भवति?

(1) प्रचण्डः (2) दर्पभूयिष्ठः (3) क्षमावान् (4) चपलः

97. साहित्यदर्पणकारेण ''अनेकार्थयोजनं श्रुतिसाम्यतः'' इतीदं कस्य लक्षणं कृतम्?

(1) छलस्य (2) त्रिगतस्य (3) प्रपञ्चस्य (4) यमकस्य

98. ''रथाङ्गपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजिरे'' – अत्र रथाङ्गपाणिः कः?

(1) नारदः (2) रावणः (3) श्रीकृष्णः (4) शिशुपालः

99. ''अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः'' – अत्र कोऽलंकारः?

(1) भ्रान्तिमान् (2) सन्देहः (3) अपह्नुतिः (4) रूपकम्

100. ''दोषा गुणा गुणा दोषा यत्र स्युः'' साहित्यदर्पणे इदं कस्य लक्षणं कृतम्?

(1) मार्दवस्य (2) वाक्केलेः (3) वीथ्यङ्गस्य (4) व्याहारस्य

- o O o -

**Space For Rough Work**